"स्वादुशीरं मृणालञ्च सेव्यं लामज्जकन्तथा।"
इति गारुड़े २०८ अध्यायः॥)
सेव्यः, पुं, (सेव्यते इति। सेव+ण्यत्।) अश्वत्थवृक्षः। इति राजनिर्घण्टः॥ हिज्जलवृक्षः। इति शब्दरत्नावली॥
सेव्यः, त्रि, (षेव सेवने+ण्यत्।) सेवार्हः। इति मेदिनी॥ (यथा, कथासरित्सागरे। ५२। १३७।
"अहं तं सेव्यमन्वेषां करिष्यामीश्वरं क्षणात्। तत्तं वृणीष्व भर्त्तारं यदि ते पुत्त्रि रोचते॥")
सेव्या, स्त्री, (सेव+ण्यत्। टाप्।) वन्दाकवृक्षः। इति शब्दरत्नावली॥
सै, क्षित्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-अनिट्।) सायति। क्षितिः क्षयः। इति दुर्गादासः॥
सैंहः, त्रि, (सिंहस्यायमिति। सिंह+अण्।) सिंहसम्बन्धी। सिंहतुल्यः। इति सिद्धान्तकौमुदी॥ (स्त्रियां ङीप्। यथा, माघे।१।४७।
"सटाच्छटाभिन्नघनेन बिभ्रता
नृसिंह सैंहीमतनुं तनुं त्वया।
स मुग्धकान्तास्तनसङ्गभङ्गुरै-
रुरोविदारं प्रतिचस्करे नखैः॥
सैंहली, स्त्री, (सिंहले देशे भवा। सिंहल+अण्। ङीप्।)सिंहपिप्पली। तत्पर्य्यायः। सर्पदण्डा २ सर्पाक्षी ३ ब्रह्मभूमिजा ४ पार्व्वती५ शैलजा ६ ताम्रा ७ लम्बबीजा ८ उत्कटा ९ अद्रिजा १० सिंहलस्था ११ लम्बदन्ता १२ जीवला १३ जीवाला १४ जीवनेत्री १५ कुरम्बी १६। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। जन्तुनाशित्वम्। दीपनत्वम्। कफश्वाससमीरार्त्तिशमनत्वम्। कोष्ठशोधनत्वञ्च। इति राजनिर्घण्टः॥ सिंहलद्वीपभवे, त्रि॥
सैंहिकः, पुं, (सिंहिकायां भवः। अण्।) राहुः। इति शब्दरत्नावली॥
सैंहिकेयः, पुं, (सिंहिकाया अपत्यं पुमानिति। सिंहिका+ढक्।) राहुः। इत्यमरः॥ (यथा, माघे। २। ३५।
"म्रियते यावदेवैकोऽपि रिपुस्तावत् कुतः सुखम्। पुरः क्लिश्नाति सोमं हि सैंहिकेयोऽसुरद्रुहाम्॥")
सैकतं, क्ली, (सिकताः सन्त्यत्रेति। अण्।) वालुकामयतटम्। इत्यमरः। १। ३। २६॥ (यथा, कुमारे। १। २९।
"मन्दाकिनीसैकतवेदिकाभिः
सा कन्दुकैः कृत्रिमपुत्त्रकैश्च।
रेमे मुहुर्मध्यगता सखीनां
क्रीड़ारसं निर्विशतीव बाल्ये॥"
सैकतः, त्रि, (सिकताः सन्त्यत्रेति। सिकता+"सिकताशर्कराभ्याञ्च।" ५। २। १०४। इति अण्।) सिकतामयः। इत्यमरः।३। १। ७॥ तत्पर्य्यायः। सिकतिलः२ सिकतावान्३। इति राजनिर्घण्टः॥ (यथा, भागवते। ११।२७।१२।
"शैली दारुमयी लौही लेप्या लेख्या च सैकती। मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता॥")
सैकतिकं, क्ली, मालयात्रा। मङ्गलसूत्रकम्। इति मेदिनी॥
सैकतिकः,पुं,(सैकतं पुलिनं प्रियत्वेनास्त्यस्येति। सैकत+ठन्।) संन्यस्तः। क्षपणकः। सन्देहजीविनि, त्रि। इति मेदिनी॥
सैकतेष्टं,क्ली,(सैकतं स्थानमिष्टमस्य।)आर्द्रकम्। इति राजनिर्घण्टः॥ वालुकामयग्रन्थौ, त्रि॥
सैतवाहिनी, स्त्री, बाहुदानदी। इत्यमरः। १। १०। ३३।
सैद्धान्तिकः,त्रि,(सिद्धान्तं वेत्तीति। सिद्धान्त+ठक्।) सिद्धान्तज्ञः। इति हेमचन्द्रः कौमुदी च॥
सैनापत्यं,क्ली,(सेनापतेर्भावः कर्म्म वा। सेनापति+"पत्यन्तपुरोहितादिभ्यो यक्।"५।१।१२८। इति यक्।) सेनापतेर्भावः। तत्कर्म्म च। इति सिद्धान्तकौमुदी॥(यथा,मनुः।१२।१००।
"सैनापत्यञ्च राज्यञ्च दण्डनेतृत्वमेव च। सर्व्वलोकाधिपत्यञ्च वेदशास्त्रविदर्हति॥"
सेनापतेरिदमिति।"दित्यदित्यादित्येति।"४। १। ८५। इति ण्यः।) सेनापतिसम्बन्धिनि, त्रि॥
सैनिकः,पुं,(सेनां समवैतीति। सेना+"सेनाया वा।" ४। ४। ४५। इति पक्षे ठक्।) सेनायां समवेतः। इत्यमरः। २। ८। ६१॥ मिलितहस्त्यश्वरथपादातं सेना तत्र ये समवेताः एकदेशीभूतास्ते सैन्याः सैनिकाश्च। इति भरतः॥ (यथा, रघुः। ३। ६१।
"निमेषमात्रादवधूय तद्व्यथां
सहोत्थितः सैनिकहर्षनिस्वनैः॥")
सैन्यरक्षकः। इति मेदिनी अमरश्च॥ प्राणिवधनियुक्तः। यथा, श्रीभागवते पञ्चमस्कन्धगद्यम्। ये त्विह वै पुरुषाः पुरुषमेधेन यजन्ते याश्च स्त्रियो नृपशून् खादन्ति तांश्च ताश्च ते पशव इह निहता यमसदने यातयन्तो रक्षोगणाः सैनिका इव स्वधितिना अवदायासृक् पिबन्तीति। सैनिकाः प्राणिवधनियुक्ताः। इति तिथ्यादितत्त्वम्॥ सेनासम्बन्धिनि, त्रि॥(यथा, महाभारते। ७। १९०। ४१।
'एवं तं निहतं संख्ये ददृशे सैनिको जनः॥")
सैन्धवं, क्ली, पुं,(सिन्धौ समुद्रतीरे सिन्धुदेशे वा भवम्। सिन्धु+"अणञौ च।"४।३।३३। इति अण्।)लवणविशेषः। स तु सिन्धुनद्युपलक्षितदेशोद्भवः। तत्पर्य्यायः। शीतशिवम् २ माणिमन्थम् ३ सिन्धुजम् ४। इत्यमरः। २।९।४२॥ 'वशिरम् ५ सिन्धुदेशजम् ६ माणिबन्धम् ७। इति जटाधरः॥ शितशिवम् ८। इति शब्दरत्नावली॥ नादेयम् ९ शिवम् १० सिद्धम् ११ शिवात्मजम् १२ पथ्यम् १३। अस्य गुणाः।
"सैन्धवं लवणं हृद्यं चक्षुष्यं दीपनं रुचि। पूतं स्वादु त्रिदोषघ्नं व्रणदोषविबन्धजित्॥ सैन्धवं द्विविधं ज्ञेयं सितं रक्तमिति क्रमात्॥ रसवीर्य्यविपाकेषु गुणाढ्यं कथितं सितम्॥"
इति राजनिर्घण्टः॥
अपि च।
"सैन्धवं लवणं स्वादु दीपनं पाचनं लघु। स्निग्धं रुच्यं हिमं हृद्यं सूक्ष्मनेत्रं त्रिदोषहृत्॥"
इति भावप्रकाशः॥
किञ्च।
"सैन्धवं दोषजिद्वृष्यं चक्षुष्यमविदाहि च। अग्निसन्दीपनं स्निग्धं रोचनं मधुरं लघु॥"
इति राजवल्लभः॥
तत्तु हविष्यान्नम्। यथा, स्मृतिः।
"लवणे सैन्धवसामुद्रे गव्ये च दधिसर्पिषी।"
इति हविष्यान्नगणने तिथ्यादितत्त्वम्॥
सैन्धवः, पुं, (सिन्धुरभिजनोऽस्येति। सिन्धु+"सिन्धुतक्षशिलादिभ्योऽणञौ।"४।३।९३।इति अण्।) घोटकः। स तु सिन्धोरदूरभवः। विकारसंघेति अदूरभवार्थे अणः। इत्यमरभरतौ। २।८।४४। (यथा, भागवते।९।१।२३।
"स एकदा महाराज! विचरन् मृगयां वने। वृतः कतिपयामात्यैरश्वमारुह्य सैन्धवम्॥"
सिन्धुदेशाधिपतिः। जयद्रथः। यथा, महाभारते। १। १। १९६।
"यदा द्रोणः कृतवर्म्मा कृपश्च
कर्णो द्रौणिर्मद्रराजश्च शूरः।
अमर्षयन् सैन्धवं वध्यमानं
तदा नाशंसे विजयाय सञ्जय॥"
सिन्धुदेशोत्पन्नमात्रे। यथा, तत्रैव। ३। ५१। २४
"हारहूनांश्च चीनांश्च तुखारान् सैन्धवांस्तथा॥")
सैन्धी, स्त्री, तालादिरसनिर्य्यासः। तत्पर्य्यायः। हाला २। अस्या गुणाः। शीतलत्वम्। कषायत्वम्। अम्लत्वम्। पित्तदाहनाशित्वम्। वातदत्वञ्च। इति राजनिर्घण्टः॥
सैन्यं, क्ली, (सेना एव। चतुर्वर्णादित्वात् ष्यञ्।) सेना इत्यमरः। २।८।७८॥ (यथा, मार्कण्डेये। ८७। २१।
"हतशेषं ततः सैन्यं दृष्ट्वा चण्डं निपातितम्। मुण्डञ्च सुमहावीर्य्यं दिशो भेजे भयातुरम्॥")
सैन्यः,पुं, (सेनां समवैतीति। सेना+"सेनाया वा।" ४।४।४५। इति ण्यः।) सेनासमवेतः। इत्यमरः। २। ८। ६१।"मिलितहस्त्यश्वरथपादातं सेना तत्र ये समवेता एकदेशीभूतास्ते सैन्याः सैनिकाश्च।" इति भरतः॥ किञ्च।
"सैन्यं क्लीवं बलेऽशे ना समवेते तु वाच्यवत्॥"
इति मेदिनी॥
सैन्यपृष्ठं,क्ली, (सैन्यस्य पृष्ठम्।) सैन्यस्य पश्चाद्भागः। यत्र स्थित्वा राजा स्वसैन्यं प्रतिगृह्णाति। तत्पर्य्यायः। प्रतिग्रहः २। इत्यमरः॥ परिग्रहः ३। इति भरतः॥ पतद्ग्रहः ४। इति टीकान्तरम्॥